# Sarvamangalamangalyaghatalakshmivratanirupanam

# સર્વમઙ્ગલમાઙ્ગલ્યઘટલક્ષ્મીવ્રતનિરૂપણમ્

## Document Information

Text title : Sarvamangalamangalyaghatalakshmivratanirupanam

File name : sarvamangalamAngalyaghaTalakShmIvratanirUpaNam.itx

Category : devii, devI, lakShmInArAyaNIyasaMhitA, lakShmI, mangala

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 137/71-86||

Latest update : April 12, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 12, 2026

*sanskritdocuments.org*

Sarvamangalamangalyaghatalakshmivratanirupanam

# સર્વમઙ્ગલમાઙ્ગલ્યઘટલક્ષ્મીવ્રતનિરૂપણમ્

(માર્ગશીર્ષે તથા વૈશાખે કાર્યમ્)
માર્ગશીર્ષે ચ વૈશાખે ઊર્જે વા શુક્લપક્ષકે ।
મણ્ડપોધાનસંયુક્તામુધાપનસમન્વિતામ્ ॥ ૭૧॥

કરિષ્યન્તિ નરા નાર્યો યાસ્યન્તિ તે પરાં ગતિમ્ ।
પઞ્ચગવ્યેન ક્ષીરેણ પુષ્પગન્ધોદકેન ચ ॥ ૭૨॥

મધુના સ્નાપયેત્ત્વાં સમ્પૂજયેત્ ફલપુષ્પકૈઃ ।
શ‌ૃઙ્ગારયેદ્ભૂષયેચ્ચ વિભૂષયેન્નીરાજયેત્ ॥ ૭૩॥

ભોજયેચ્ચ તતઃ પુષ્પાઞ્જલિં દદ્યાત્ સુમૂર્તયે ।
ક્ષમાં યાચેત ચ નમેત્ પ્રાર્થયેદ્ગુરવેઽર્પયેત્ ॥ ૭૪॥

“મહાલક્ષ્મ્યૈ નમઃ પાદૌ તવ ગુલ્ફૌ નમઃ શ્રિયૈ ।
શોકહન્ત્ર્યૈ નમો જઙ્ઘે રમાયૈ જાનુની નમઃ ॥ ૭૫॥

ઊરૂ મઙ્ગલકારિણ્યૈ વક્ષઃસ્થલ્યૈ નમઃ કટિમ્ ।
પદ્માયૈ નમ ઉદરમુરઃ કામશ્રિયૈ નમઃ ॥ ૭૬॥

કરૌ સૌભાગ્યલક્ષ્મ્યૈ તે બાહૂદરમુખં શ્રિયૈ ।
કમલાયૈ નમો નાસાં પદ્મિન્યૈ લોચને નમઃ ॥ ૭૭॥

પુષ્ટ્યૈ લલાટમલકાન્ હિરણ્યાયૈ શિરો નમઃ ।
હરિણ્યૈ સુખદાલક્ષ્મ્યૈ લલિતાયૈ નમો નમઃ ॥ ૭૮॥

નારાયણ્યૈ વાસુદેવ્યૈ સમ્પદાયૈ નમોઽસ્તુ તે ।
સર્વમઙ્ગલમાઙ્ગલ્યં દેહિ મે માતરીશ્વરિ ॥ ૭૯॥

સર્વમઙ્ગલમાઙ્ગલ્યવ્રતેન તવ પદ્મજે ।
મમેષ્ટં સર્વમેવાઽસ્તુ કૃપયા તવ ચાબ્ધિજે ॥ ૮૦॥

ગીતમઙ્ગલનિર્ઘોષાન્ કારયેદ્યજમાનકઃ ।

સુવાસિન્યઃ કન્યકાશ્ચ કુર્યુર્ગીતાનિ તત્ર ચ ॥ ૮૧॥

પૂજયેયૂ રક્તવસ્ત્રૈ રક્તમાલ્યાનુલેપનૈઃ ।
કુસુમૈરક્ષતૈર્વાર્ભિર્નમસ્કારૈઃ પ્રભોજનૈઃ ॥ ૮૨॥

સિન્દૂરકુઙ્કુમતૈલસારકસ્તૂરિકાઽઞ્જનૈઃ ।
એવં સમ્પૂજ્ય તાં મૂર્તિં દદ્યાચ્છ્રીગુરવે શુભામ્ ॥ ૮૩॥

ગુરું સમ્પૂજયેચ્ચાપિ કમલૈશ્ચન્દનાદિભિઃ ।
પરિહારં તતઃ કુર્યાદ્ભોજયેદ્બાલબાલિકાઃ ॥ ૮૪॥

સર્વમઙ્ગલમાઙ્ગલ્યલક્ષ્મીવ્રતમિદં પરમ્ ।
યઃ કુર્યાત્તસ્ય માઙ્ગલ્યં બહુધા વૈ વસેદ્ગૃહે ॥ ૮૫॥

સર્વપાપવિનાશશ્ચ સૌભાગ્યારોગ્યવર્ધનમ્ ।
સર્વામોદપ્રમોદેષ્ટાનન્દસૌખ્યપ્રદં વ્રતમ્ ॥ ૮૬॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ દ્વાપરયુગસન્તાનાત્મકસ્ય તૃતીયખણ્ડે
૧૩૭-અધ્યાયાન્તર્ગતં માર્ગશીર્ષે તથા વૈશાખે કાર્યં
સર્વમઙ્ગલમાઙ્ગલ્ય ઘટલક્ષ્મીવ્રતનિરૂપણં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૩। અધ્યાય ૧૩૭/૭૧-૮૬॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 137/71-86..

Proofread by PSA Easwaran

*Sarvamangalamangalyaghatalakshmivratanirupanam*

pdf was typeset on April 12, 2026

Please send corrections to *sanskrit@cheerful.com*